# श्री राहु कवचं

अस्य श्री राहु कवच स्तोत्रमन्त्रस्य चन्द्रमा ऋषिः
अनुष्टुप् चन्दः रं बीजं नमः शक्तिः
स्वाहा कीलकं राहु प्रीत्यऱ्थं जपे विनियोगः

प्रणमामि सदा राहुं शूऱ्पाकारं कीरीटिनीं
सैन्हिकेयं करालास्यं लोकानामभयप्रदं 1

नीलांबरः शिरः पातु ललाटं लोकवन्दितः
चक्षुषी पातु मे राहुः श्रोत्रे त्वऱ्द्धशरीरवान् 2

नासिकां मे धूम्रवऱ्णः शूलपाणिऱ्मुखं मम
जिह्वां मे सिंहिका सूनुः कण्ठं मे कठिनांध्रिकः 3

भुजंगेशो भुजौ पातु नीलमाल्यांबरः करौ
पातु वक्षःस्थलं मन्त्री पातु कुक्षिं विधुंतुदः 4

कटिं मे विकटः पातु ऊरू मे सुरपूजितः
स्वऱ्भानुऱ्जानुनी पातु जंघे मे पातु जाव्यः 5

गुल्फौ ग्रहपतिः पातु पादौ मे भीषणाकृतिः
सऱ्वाण्यंगानि मे पातु नीलचन्दनभूषणः 6

राहोरिदं कवचमृद्धिदवस्तुदं यो भक्ता पठत्यनुदिनं नियतः शुचि सन् प्राप्नोति
कीऱ्त्तिमतुलां श्रियमृद्धिं
आयुरारोग्यमात्मविजयं च हि तत्प्रसादात् 7

इति श्री माहाभारते धृतराष्ट्रसञ्जय संवादे द्रोणपर्वणि  राहु कवचं संपूर्ण्णं !